श्री सूर्य स्तवराज स्तोत्रं

श्री सूर्य स्तवराज स्तोत्रं

ब्रह्मोवाच |
स्तवनं सामवेदोक्तं सूर्यस्य व्याधिमोचनं |
सर्वपापहरं सारं धनारोग्यकरं परं || 1 ||

तं ब्रह्म परमं धाम ज्योतीरूपं सनातनं |
त्वामहं स्तोतुमिच्छामि भक्तानुग्रहकारकं || 2 ||

त्रैलोक्यलोचनं लोकनाथं पापविमोचनं |
तपसां फलदातारं दुःखदं पापिनां सदा || 3 ||

कर्मानुरूपफलदं कर्मबीजं दयानिधिं |
कर्मरूपं क्रियारूपमरूपं कर्मबीजकं || 4 ||

ब्रह्मविष्णुमहेशानामंशं च त्रिगुणात्मकं |
व्याधिदं व्याधिहंतारं शोकमोहभयापहं |
सुखदं मोक्षदं सारं भक्तिदं सर्वकामदं || 5 ||

सर्वेश्वरं सर्वरूपं साक्षिणं सर्वकर्मणां |
प्रत्यक्षं सर्वलोकानामप्रत्यक्षं मनोहरं || 6 ||

शश्वद्रसहरं पश्चाद्रसदं सर्वसिद्धिदं |
सिद्धिस्वरूपं सिद्धेशं सिद्धानां परमं गुरुं || 7 ||

स्तवराजमिदं प्रोक्तं गुह्याद्गुह्यतरं परं |
त्रिसंध्यं यः पठेन्नित्यं व्याधिभ्यः स प्रमुच्यते || 8 ||

आंध्यं कुष्ठं च दारिद्र्यं रोगः शोको भयं कलिः |
तस्य नश्यति विश्वेश श्रीसूर्यकृपया ध्रुवं || 9 ||

महाकुष्ठी च गलितो चक्षुर्हीनो महाव्रणी |
यक्ष्मग्रस्तो महाशूली नानाव्याधियुतोऽपि वा || 10 ||

मासं कृत्वा हविष्यान्नं श्रुत्वाऽतो मुच्यते ध्रुवं |
स्नानं च सर्वतीर्थानां लभते नात्र संशयः || 11 ||

इति श्रीब्रह्मवैवर्ते महापुराणे गणपतिखंडे एकोनविंशोऽध्याये ब्रह्मकृत श्री सूर्य स्तवराजं |